Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीः

नेपाल-राजकीय-
वीरपुस्तकालयस्थपुस्तकानाम्

बृहत्सूचीपत्रम्

यस्यायम्

व्याकरणविषयकः

षष्ठो भागः

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुरातत्वप्रकाशकमाला २८

श्रीः

नेपालराजकीय-
वीरपुस्तकालयस्थपुस्तकानाम्

बृहत्सूचीपत्रम्

यस्यायम्

व्याकरणविषयकः

षष्ठो भागः

श्री ५ को सरकार
शिक्षा मन्त्रालय
पुरातत्त्व विभाग
वीर पुस्तकालय

बुद्धिसागरशर्मणः अध्यक्षतायां
पं. बाबुकृष्ण शर्मणा संपादितः

वीरपुस्तकालयतः
प्रकाशितः

मूल्य

२०२१ फाल्गुन ७ गते 'प्रजातन्त्र दिवस'

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विभागीयवक्तव्य

श्री ५ को सरकार पुरातत्त्व विभाग वीरपुस्तकालयको यो नौलो उपहार व्याकरण सम्बन्धी भएकोले विशेष महत्व राख्दछ । व्याकरण कुनै पनि साहित्यको प्रमुख अंग हो भन्नु अत्युक्ति नहोला । अझ संस्कृतका विद्वान्हरूले व्याकरणको परिष्कार प्रशस्त मात्रामा गरेका छन् । संस्कृतको व्याकरण जस्तो विशाल एवं परिष्कृत व्याकरण अरू कतै दुर्लभ छ । आर्य भाषा परिवारमा यसको अत्यन्त ठूलो देन छ । यहाँ प्राचीन युगमा सारस्वत व्याकरणको र वर्तमान युगमा पाणिनि व्याकरणको अध्ययन अध्यापन चलेको छ । साथै वैदिक अवैदिक सबै किसिमका विद्वान्हरूका व्याकरण यहाँ प्राप्त छन् । यस्तो महत्वपूर्ण क्षेत्रमा समयानुकूल दृष्टिपात गरेकोमा पुरातत्त्व विभाग वीरपुस्तकालय-लाई धन्यवाद छ ।

काठमाण्डौ
०२१ । ११ । ७

रमेशजंग थापा
निर्देशक पुरातत्त्व विभाग

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुस्तकालयीयवक्तव्यम्

विदितमेवैतत् सर्वेषां विदुषां यद् वीरपुस्तकालयस्थ ग्रन्थानां बृहत्सूचीपत्रं क्रमशः प्रकाशमुपगच्छदस्तीति । अस्मिन्नेव सन्दर्भे बृहत्सूचीपत्रस्य पञ्चभागाः प्रकाशमुपगताः; अधुना व्याकरणग्रन्थानां सूचीपत्रं तत्र भवतां पुरतः प्रस्तुतं वर्तते, तदिदं सूचीपत्रम् अत्रत्यस्य बृहत्सूचीपत्रस्य षष्ठोभागः । अनेन प्रकाशनेन वैयाकरणाः सुधियो भृशं प्रसन्ना भविष्यन्ति, तदितरे व्याकरणग्रन्थान्वेषणकर्तारः इतिहासगवेषणाकर्तारः संस्कृतवाङ्मयानुसन्धानकर्तारश्च प्रसादमेष्यन्तीति मे मनीषावर्तते ।

व्याकरणं वैदिकवाङ्मयस्य मुखमत एव अन्येभ्योऽङ्गेभ्यो व्याकरणस्य मुख्यत्वं शास्त्रान्तरप्रणेतारोऽपि हृदयत एव समर्थयन्ति, यथा सिद्धान्तशिरोमणौ भास्कराचार्यः

यो वेदवेदवदनं सदनं हि सम्यग्
ब्राह्म्याः स वेदमपि वेद किमन्यशास्त्रम्
तस्मादतः प्रथममेतदधीत्य धीमान्
शास्त्रान्तरस्य भवति श्रवणेऽधिकारी

(सि. शि. गो. अ. ८)

एवं ज्यौतिषशास्त्रमपि व्याकरणशास्त्रस्य मुख्यत्वं प्रतिपादयति । अतएव संस्कृतवाङ्मयमधिजिगमिषवो विद्वांसः प्रथमं व्याकरणशास्त्रमेवाधियते । किं बहुना वेदाप्रामाण्यवादिनोऽपि बौद्धाजैनाश्च एतस्य व्याकरणशास्त्रस्य मुख्यत्वं स्वीकुर्वते । ऋते व्याकरणात् न तेषामपि वाङ्मये सुप्रवेशः । यथा जामातृकृते प्रज्वालितो दीपः सर्वेषामेव प्रकाशकरः, तथैव वेदार्थज्ञानाय प्रवर्त्तितं व्याकरणं वेदाप्रामाण्यवादिनामप्युपकारं करोति । एष एव विधिः पौरस्त्यैराचार्यैर्महर्षिभिश्च विरचितानां सर्वेषां ग्रन्थरत्नानाम् । अत्र बौद्धाचार्यधर्मकीर्तिमहोदयविरचितमपि व्याकरणपुस्तकं प्राचीनं ताडपत्रलिखितमस्ति । एवमन्येपि अत्र केके ग्रन्थाः सन्तीति विदुषां जिज्ञासा स्वकरकमलोपस्थितेन अनेनैव सूचीपत्रेण पूर्णा भविष्यति । एतस्य संपादन संशोधनादिकार्ये परिश्राम्यन पण्डितो वाबुकृष्णः, इतरे च कर्मकरा धन्यवादार्हाः । लिपिकरणे सीसाक्षरयोजनायां मुद्रणे च प्रमादादज्ञानाद्धस्तनयनाद्यपाटवाच्च सन्त्येवात्र भूयांसो दोषा अवशिष्टाते च गुणैकपक्षपातिनां विदुषां क्षम्याः स्युरितिविश्वासः । सोऽयं बृहत्सूचीपत्रस्य व्याकरणविषयकः षष्ठो भागः २०२१ तमविक्रमसंवत्सरान्तर्गतप्रजातन्त्रोत्सवदिवसे निर्गच्छन् सर्वेषामेव नेपालीयानां मनसि कमपि महान्तं प्रमोदमाधास्यति ।

अन्ततो गत्वा श्री ५ महाराजाधिराजपृथ्वीनारायणसाहदेवेन नेपालीयप्रजावर्गस्य हृदि यद् राष्ट्रियचेतनाज्योतिः प्रज्वालितं तद् वर्तमानस्य श्री ५ महाराजाधिराजस्य महेन्द्रवीरविक्रम साहदेवस्य सुयोग्यनेतृत्वे उत्तरोत्तरं सुदीप्तं सुप्रकाशं च भवेदिति शुभाशंसापूर्वकं संदर्भादस्माद् विरमति ।

काष्ठमण्डपः
०२१ । ११ । ७

बुद्धिसागरः पराजुलिः
अध्यक्षो वीरपुस्तकालयस्य

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

व्याकरणग्रन्थाः

अष्टाध्यायी

क्रमाङ्कः प्र. १४०२ विषयाङ्कः १

ग्रन्थकारः पाणिनिः। नेपालीयं कागतम्। देवनागरी लिपिः। पंक्तयः ८। आकारः १०×४१/२ ग्रन्थसंख्या ७००। पत्रसंख्या ५०। पूर्णा।

आदिवाक्यम्

श्रीगणेशाय नमः। येनाक्षरः समाम्नायमधिगम्य महेश्वरात्।। कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः।। येन धौता गिर' पुसां विमलैः शब्दवारिभिः।। मतश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः। अइउण्। ऋऌक्, एओङ्। ऐऔच्। हयवरट्। लण्। ञमङणनम्। झभञ्। घढधश्। जबगडदश्‌ खफछठथचटतव्। कपय्। शषसर्। हल्। वृद्धिरादैच्। अदेङ्गुणः। इकोगणवृद्धिः! न धातुलोपः। आर्द्धधातुके। क्ङितिच। दिधीवेवीटां। हलोन्तरा संयोगः। मुखनासिकावचनोऽनु नासिकः। तुल्यासप्रयत्नं सवर्णम्। नाज्जलौ।।

अन्त्यवाक्यम्

धातुसूत्रगणोणादि वाक्य लिङ्गानुशासनमू।। आगमः प्रत्ययादेशाः उपदेशाः प्रकीर्तिता।। छन्द पादौ तु वेदस्य हस्तौ कल्पोऽ धपद्यते !।। मुखं व्याकरणं प्रोक्तं ज्योतिषं नेत्रमुच्यते।। शिक्षा घ्राणं तु वेदस्य निरुक्तं श्रोत्रमुच्यते।।

पुष्पिकावाक्यानि

इति प्रथमाध्यायस्य	प्रथमः पादः।
,, ,,	द्वितीयः पादः।
,, ,,	तृतीयः पादः।
,, ,,	चतुर्थः पादः।
इति द्वितीयाध्यायस्य	प्रथमः पादः:।
,, ,,	द्वितीयः पादः।
,, ,,	तृतीयः पादः।
,, ,,	चतुर्थः पादः।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

,, तृतीयाध्यायस्य		प्रथमः पादः ।
,,	,,	द्वितीयः पादः ।
,,	,,	तृतीयः पादः ।
,,	,,	चतुर्थः पादः ।
,, चतुर्थाध्यायस्य		प्रथमः पादः ।
,,	,,	द्वितीयः पादः ।
,,	,,	तृतीयः पादः
,,	,,	चतुर्थः पादः ।
,, पञ्चमाध्यायस्य		प्रथमः पादः ।
,,	,,	द्वितीयः पादः
,,	,,	तृतीयः पादः ।
,,	,,	चतुर्थः पादः ।
,, षष्टस्य		प्रथमः पादः ।
,,	,,	द्वितीयः पादः ।
,,	,,	तृतीयाः पादः ।
,,	,,	चतुर्थः पादः ।
,, सप्तमस्य		प्रथमः पादः ।
,,	,,	द्वितीयः पादः ।
,,	,,	तृतीयः पादः ।
,,	,,	चतुर्थः पादः ।
,, अष्टमस्य		प्रथमः पादः ।
,,	,,	द्वितीयः पादः ।
,,	,,	तृतीयः पादः ।
,,	,,	तुरीयः पादः ।

संवत् १८२१ नारायणेन लिखितम् ।

अष्टाध्यायी

क्रमाङ्कः प्र १४०२ विषयाङ्कः २

ग्रन्थकारः पाणिनिः । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पंक्तयः ७ । आकारः ८$\frac{५}{२}$ × ३$\frac{३}{४}$ । ग्रन्थसंख्या ५५० । पत्रसंख्या ४५ । पञ्चमाध्यायस्य प्रथमपादान्ता ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अष्टाध्यायी

क्रमाङ्कः प्र १५०१ विषयाङ्कः ३

ग्रन्थकारः पाणिनिः । नेपालीयं कागतम् । नेवारी लिपिः । पंक्तयः ११।१२ । आकारः ११×४३/४ । ग्रन्थसंख्या ११०० । पत्रसंख्या ३३ । पूर्णा ।

अष्टाध्यायी

क्रमाङ्कः प्र १४०२ य ङ्कः ४

ग्रन्थकारः पाणिनिः । नेपालीयं कागतम् । मैथिली लिपिः । पंक्तयः ६ । आकारः ७×२१/२ । ग्रन्थसंख्या २०० । पत्रसंख्या २४ । प्रकीर्णरुपा ।

अष्टाध्यायी

क्रमाङ्कः प्र ४६८ विषयाङ्कः ५

ग्रन्थकारः पाणिनिः । ताडपत्राणि । मैथिली लिपिः । पंक्तयः ४ । आकारः १५३/८×१६/८ । ग्रन्थसंख्या १६० । पत्रसंख्या १२ । अपूर्णा ।

अष्टाध्यायी

क्रमाङ्कः तृः ४५२ विषयाङ्कः ६

ग्रन्थकारः पाणिनिः । नेपालीयं कागतम् । देवनागरी लिपिः । पंक्तयः ६ । आकारः ६१/२×४ । ग्रन्थसंख्या ६८० । पत्रसंख्या ४६ । पूर्णा ।

अष्टाध्यायी

क्रमाङ्कः तृ. ६८ विषयाङ्कः ७

ग्रन्थकारः पाणिनिः । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पंक्तयः ६।१० । आकारः ११×४३/४ ग्रन्थसंख्या ६० । पत्रसंख्या १४।३ अध्याय २ पादात्ता अपूर्णा ।

अष्टाध्यायी

क्रमाङ्कः द्वि॰ १४५ विषयाङ्कः ८

ग्रन्थकारः पाणिनिः । नेपालीयं कागतम् । देवनागरी लिपिः । पंक्तयोऽनियताः । आकारः १०३/८×४ । ग्रन्थसंख्या १२०० । पत्रसंख्या ५५ । पूर्णा ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अष्टाध्यायी

क्रमाङ्कः च. ३२६ विषयाङ्कः ९

ग्रन्थकारः पाणिनिः । ताडपत्राणि । मैथिली लिपिः । पंक्तयः ६ । आकारः ११×४३ ग्रन्थ-संख्या । पत्रसंख्या ६४। पूर्णप्रायः। समयः। ल.सं (लक्ष्मण संवत्) ४३७।

अष्टाध्यायी

क्रमाङ्कः तृ. ६८ विषयाङ्कः १०

ग्रन्थकारः पाणिनिः। मध्यदेशीय कागतम् । देवनागरी लिपिः । पंक्तयः ६।१०। आकारः ११×४३ ग्रन्थसंख्या ४०। पत्रसंख्या १४। तृपादिमात्रम्।

अष्टाध्यायी

क्रमाङ्कः तृ. २३ विषयाङ्कः ११

ग्रन्थकारः पाणिनिः। नेपालीय कागतम् । देवनागरी लिपिः। पंक्तयः ६। आकारः ११३×५३। ग्रन्थसंख्या ८००। पत्रसंख्या १०४। संपूर्णा ॥

अष्टाध्यायी

क्रमाङ्कः द्वि. ३६२ विषयाङ्कः १२

ग्रन्थकारः पाणिनिः । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पंक्तयः १०। आकारः १०३×४३। ग्रन्थसंख्या ६५०। पत्रसंख्या ३२। ८ अध्यातिमका पूर्णा। समयः शाके १६६६।

अष्टाध्यायी

क्रमाङ्कः द्वि. ३६७ विषयाङ्कः १३

ग्रन्थकारः पाणिनिः। नेपालीय कागतम्। देवनागरी लिपिः। पंक्तयः ६। आकारः ११३×४३ ग्रन्थसंख्या ६००। पत्रसंख्या ५३। पूर्णा। समयः सं. १८६८।

अष्टाध्यायी

क्रमाङ्कः प्र. १४००। विषयाङ्कः १४

ग्रन्थकारः पाणिनिः। नेपालीयं कागतम्। देवनागरी लिपिः। पंक्तयः ८। आकारः ११३×४३। ग्रन्थसंख्या । पत्रसंख्या ८०। मध्यखण्डिता। समयः सं. १८१७।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अष्टाध्यायीसूत्रपाठः

क्रमाङ्कः प्र. ८८२ विषयाङ्कः १५

ग्रन्थकारः पाणिनिः । नेपालीयं कागतम् । देवनागरी लिपिः । पंक्तयः ७। आकारः ६½×४½। ग्रन्थसंख्या १२०। पत्रसंख्या ६। आदिमध्यखण्डित ।

आख्यातप्रकरणम् (कातन्त्रीयम्)

क्रमाङ्कः प्र. १४७३ विषयाङ्कः १६

ग्रन्थकारः………… । ताड़पत्राणि । नेवारी लिपिः । पंक्तयः ५ । आकारः ६½×१½ । ग्रन्थसंख्या ७०० । पत्रसंख्या ६१ । पूर्णम् ।

आदिवाक्यम्

ॐ नमः शिवाय । सिद्धोवर्णसमाम्नायः । तत्र चतुर्दशादौ स्वराः ।। दशसमानाः । तेषां द्वौद्वावन्योन्स्य सवर्णौ । पूर्वो ह्रस्वः । परो दीर्घः । स्वरो………वर्गाणाम् । एकारादीनि संन्ध्यक्षराणि । कादीनि व्यञ्जनानि । ते वर्गाः पञ्च पञ्च पञ्च । वर्गाणि प्रथमद्वितीयाः शषसाश्चाद्यावाः ।। व्योपवन्तान्यः । अनुनासिका ङ ञ् ण मो । अन्तस्थो यरलवाः । उष्माणः शषसहा अः इति विसर्जनीयः । ह्वइति जिह्वामूलीयः । पइत्युपध्मानीयः । अं इत्यनुस्वारः ।

अन्त्यवाक्यम्

ओतोन्त्रस्थासंयुक्तात् । ल्वाद्योदनुवन्धाच्च । त्रश्वेः कच । क दीर्घात् । श्पोस्पेशे । अनुपादानञ्चिः । अद्विजिगीवा याद्रितः । क्रीद्योतोन्दनुदविदान्यो । क्रे शुषिपचान्मेक । वाः । वायुभ्पोम् । निर्वाणोवाभेः । भित्तर्णवित्ताः शकलापमर्णभागेषु अनुपसर्गात्फ लक्षीवक्तशोल्लाधाः । अवर्णाद्वुटा बृद्धिः ।

इति कृत्सूत्रतः पष्ठपादः समाप्तः । समाप्तकातन्त्रसूत्रम्,

आख्यातप्रक्रिया

क्रमाङ्कः च. २५ विषयाङ्कः १७

ग्रन्थकारः पुञ्जराजः । नेपालीयं कागतम् । देवनागरी लिपिः । पङ्क्तयः १० । आकारः ११½×४½ । ग्रन्थसंख्या १५०० । पत्रसंख्या ६० । पूर्णा

आदिवाक्यम्.

श्री गणेशायनमः । दयावती दीव्यति देवता सा यया चिरं चेतसि विस्फुरन्त्या । सरस्वती सूत्रविचारणाया ममन्दतां विन्दति मा दृशोऽपि ।। अथाख्यात प्रक्रिया निरुप्पते । अथेति तद्धितसंज्ञकप्रत्यय संदर्भ निरुपणानन्तरं आख्यातसंज्ञकाः शाकपार्थिवादिवत् मध्यमपद लोप समासः ।। एवंस्यादिति कथनानन्तरमित्यादिमिरुपणादिवसरेकतादि शब्दानपहाय प्रथममथ शब्दः ।। प्रयुक्तो मङ्गलार्थताव्यनक्ति । नामाधिकरण निराकरण मूलम् । अधिकारान्तरं निरुपयति ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्त्यवाक्यम्

धातुना सर्वथा साकल्येन अभिधातुमशक्यं, अनन्तत्वात्। धातवोह्यनन्ताः। वर्तते हि धातुगुण इति धातुविद आचक्षते । तस्मादनन्तत्वात् । साकल्येनाभिधातुमशक्यम् । अनन्तत्वात् । हेत्वन्तरमाह । नानार्थत्वात् । यथाहि सार्थस्यरोधेः । पञ्च पञ्चादिवत् । रुपं संसिद्धार्थस्य तु अन्यथैवेति वदन्ति। तथा उपसर्गयोगेनान्यर्थत्वाच्च प्रत्ययमत्ययादिना रुप भेदापत्तेः। पाठ सूत्रलोकागमस्थितानां धातूनां साकल्पेनाभिधानमाशंक्य। तस्मात्, आचक्षते । कर्तृव्यापार इति आख्याता स्तिवादयः। तेखां(षां)ख्यापनेन अति प्रकृतिरुप भेदात् प्रकल्पनेन अलंमुर्य्यताम्। वाल व्याकुलीकरणनाति विस्तरेणेतिभावः। निर्मान्सर्य श्रीमता निर्मितायां विधाम्तापुञ्जनाम्नानृपेण सद्व्याख्यायमत्रसारस्वतस्य वक्ताख्यातप्रक्रिया यत् समाप्तिः॥

आख्यातप्रक्रिया

क्रमाङ्कः च. ७३८ विषयाङ्कः १८

ग्रन्थकारः………। मध्यदेशीयं कागतम् । देवनागरी लिपिः । पंक्तयः १४ । आकार १०×४½। ग्रन्थसंख्या ६३। पत्रसंख्या २। अपूर्णा ।

आख्यातरत्नकोशः

क्रमाङ्कः तृ ६८५ विषयाङ्कः १६

ग्रन्थकार………। ताड़पत्राणि। नेवारी लिपिः। पंङ्क्तयः ५। आकारः १२×१¾। ग्रन्थसंख्या २७००। पत्रसंख्या १६८। मध्यखण्डितः। ने. सं. ५३७

आदिवाक्यम्.

नमोवागीश्वराय ॥ सदा प्रणम्यभावेन बोधिचित्तगुणोदधिः॥ शव्दञ्ज्ञानाभभिज्ञान्तिङा-म्भेददन्तु कथ्यते। त्वं युवां यूयमित्येभिस्त्रिरेवतु मध्यमः। अहमावां वयं त्वेभिरुत्तमक्रियते तराम्॥ कालांत्रितयमालम्व्य क्रियार्थप्रकृतेरिदम् ॥ अर्थचयं प्रवर्तन्ते यथासूत्रं लडादयः॥ तङाना-श्वतङानाश्च लादेशा द्विविधामतः। कर्तव्याष्यच भावश्चे दर्थत्रयभिहेष्यते॥ तत्र डुपचष्‌पाक इति धातोर्डु पचष् डुकारोद्वितः क्रिरिवि चिन्हार्थः॥ षकारोश्विदादिषितोडिति चिन्हार्थः॥

अन्तिमंवाक्यम्

इमक्षणादन्यसमा समायविधाय सल्लक्षणशोभिरुपम् ॥ पुण्यं यदुद्भूतमनेनभूयाज्जमन्नि-रस्ताखिलमस्यतुल्यम् ॥ आख्यातरत्नकोपः समाप्तः। श्रीरघुवंशारविन्दकुण्डप्रकाशनेकमार्तण्डस्य राजाधिराजपरमेश्वरस्य परममाहेश्वरपरमभट्टारकस्य सकलगुणकलानिधानसंख्यावत्प्रतिपालनेक-निपुन(ण)स्य सकलदिक्नभोभागधवलबहलकीर्तिपरिपुरितस्य सकलजा(या) चक्रजनचिन्तामणि कल्पवृक्षस्य श्रीश्रीजयज्योतिर्मल्लदेवस्य विजयराज्येऽस्मिन् चातुर्त्रैद्यविहारचारणपट्टः सन्नीतिर

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्नार्णवः श्रीमत्पुण्यकदम्बकेशरिनिभः प्रत्यक्षविश्वम्भरः सर्वेषाम्प्रतिपालनेकनिपुनः (ण) सर्वेण माहेश्वरोजीयाज्जङ्गमकल्पवृत्तसुकृती श्रीज्योतिर्मल्ल प्रभुः ॥ श्रीमद्यशोड़च्छललितं हरितस्थिता नां संख्यावतां श्रवणयोरपिमण्डनो वै ॥ त्राह्मीन्दधाति सुतरांवरकण्ठलग्ने श्रीमान्गुणज्ञजय भैरव मल्लदेवः। सारोत्तममिदं रत्नमाख्यकातन्धातुसम्भवम् ॥ लिख्यते तेजरामेण क्रमाचान्येणधीमता अब्दे शैलकृतानुवाणसहिते मासामिनेमाधके चातुर्थीतिथिसंज्ञके भृगुदिने ऋक्षे च वर्हिस्थिते ॥ योगे गण्डवरे घटे रविगते चन्द्रे च कन्यस्थिते। ह्यो तस्मिन्समये समाप्तसकलं ह्याख्यातरत्नोत्तमम्। देवश्रीजयभैरव मल्लस्यार्थे लिखितमिति ॥

उदकानलचोरेभ्यो मूषिकेभ्यस्तथैवच। रक्षितव्य प्रयत्नेन मयाकष्टेन लिख्यते ॥शुभः॥

आख्यातरत्नकोषः

क्रमाङ्कः प्र. ११५२ विषयाङ्कः २०

ग्रन्थकार । ताडपत्राणि। नेवारी लिपिः। पंक्तयः ५। आकारः १२$\frac{१}{२}$×१$\frac{५}{८}$। ग्रन्थसंख्या ३००। पत्रसंख्या २७। अपूर्णः।

आख्यातरत्नकोषः

क्रमाङ्कः १४०७ विषयाङ्कः २१

ग्रन्थकारः । नेपालीयं कागतम्। नेवारी लिपिः। पंक्तयः ५। आकारः ६$\frac{३}{४}$×३। ग्रन्थसंख्या २७००। पत्रसंख्या १५२। अपूर्णः।

आख्यातरत्नकोषः

क्रमाङ्कः प्र. १६६७ विषयाङ्कः २२

ग्रन्थकारः । ताडपत्राणि। नेवारी लिपिः। पंक्तयः । आकारः । ग्रन्थसंख्या पत्रसंख्या ८२। प्रकीर्णः।

आख्यातवादटीका

क्रमाङ्कः प्र. १४६३ विषयाङ्कः २३

ग्रन्थकारः। जयरामो न्यायपञ्चाननः । मध्यदेशीयं कागतम् । देवनागरी लिपिः। पंक्तयः ८। आकारः ११$\frac{१}{२}$×३$\frac{१}{२}$। ग्रन्थसंख्या ५०। पत्रसंख्या ३। अपूर्णा।

आख्यातविचारः (तिङ्भेदो वा)

क्रमाङ्कः तृ. ३६१, विषयाङ्कः २४

ग्रन्थकारः । ताड़पत्राणि। नेवारी लिपिः। पंक्तयः ५।६। आकारः ८×२$\frac{३}{८}$। ग्रन्थसंख्या २५०। पत्रसंख्या १४। समयः ने. सं. ५४०। पूर्णः।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आदिवाक्यम्

नमो वागीश्वराय। मञ्जुघोषं प्रणम्यादौ वालानां बुद्धिवृध (द्ध) ये। शब्दज्ञानमभिज्ञानान्तिडान् भेदन्तु कथ्यते। तत्र ह्यड़ादीनां ल...नेतिवादयः। आद आदसाभवत्मिके पुनस्तलडादयः लट् लिट् लुट् लृट् लोट् इति पञ्चैतेदिन, लङ् लिङ् लुङ् लृङ् इति चत्वारो ङित्।

अन्तिमंवाक्यम्

लुङ् लङ् लृङ् ष्वरमादयो वो अटागमः। च्यतासो लृ लुटचितिस्य आडामः। चोञ्चः॥ कोश्चेति। इतेः तङिति। तस्थस्तमातान्त तङितश्च। भोन्तः। अयच्चति अयच्चत, अयच्चन्ति। अयच्चसि, अयच्चथ, अयच्चथः, अयच्चामि अयच्चावः अयच्चामः। इति ङ समाप्तः संवत् ५४० ज्येष्ट शुक्ल १३ शुभः

उणादिवृत्तिः

क्रमाङ्कः प्र. ४६८ विषयाङ्कः २५

ग्रन्थकारः……। ताड़ पत्राणि। नेवारी लिपिः। पंक्तयः ७। आकारः ११$\frac{६}{२}$×१$\frac{७}{८}$ ग्रन्थसंख्या ७६०। पत्रसंख्या ३८। आद्यन्तखण्डितः।

उणादिवृत्तिः

क्रमाङ्कः च. ४२ बिषयाङ्कः २६

ग्रन्थकार……। ताड पत्राणि। नेवारी लिपिः। पंक्तयः ६ आकार ग्रन्थसंख्या। ५००। पत्रसंख्या ३७। आद्यन्तखण्डित।

उणादिसूत्रम्

क्रमाङ्कः प्र. ३६० विषयाङ्कः २७

ग्रन्थकारः शाकटायनः। मध्यदेशीयं कागतम्। देवनागरी लिपिः। पंक्तयः १४। आकारः ६$\frac{१}{२}$×४$\frac{७}{८}$। ग्रन्थसंख्या २४०। पत्रसंख्या ७। पूर्णम्। समयः सं. १६८७

आदिवाक्यम्

श्रीगणेशाय नमः॥ कृवापाजिमिस्वदिसाध्यशुभ्य उण्। रहं स्वाकरंकहलिवलिभ्यश्च। छन्दसिणः। हसनि जनिचरिचटिभ्योञुण। किंजरय्योः श्रिणः। त्रोरश्चलः। ऋशृशृमृङ्भ्यश्च।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कृकवचश्चक; शृमृशीङ्गृचरित्सनितट नधटंनमिमस्जिभ्य उः । गड्श्च अणश्च, कटिवटिभ्यां च. धाने नित ।

पुष्पिकावाक्यम्

इत्युणादि सूत्रे प्रथमपादः ।
,, ,, द्वितीयपादः ।
,, ,, तृतीयपादः ।
,, ,, चतुर्थपादः ।

इति समाप्तः संवत् १६८७ रामराजेन लिखितम्

उपयोगक्रमः

क्रमाङ्कः प्र. १६४७ विषयाङ्कः २८

ग्रन्थकारः । ताड़पत्राणि । नेवारी लिपिः । पंक्तयः ६। आकारः ६ × १६। ग्रन्थसंख्या ३६० । पत्रसंख्या २२। मध्ये १ पत्रखण्डितः । समयः ने. सं. ४७१।

आदिवाक्यम्

नमो मञ्जुनाथाय । सुप्तिङन्तम्पदम् । अत्रसुविति स्वादयः सप्तविभक्तय गृह्यन्ते । तत्र प्रथमों अवगतो प्रथमम्प्रथमेव तद्विचार्यते । का पुनरियं प्रथमा, सु औ जसिति प्रथमा । तस्याः पुनरतल्लक्षणम् । प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमेति । तत्र पादिपदि कार्थः सत्ता सत्ताद्वैतवादिनामेतद्दर्शनम् । सत्ताप्रातिपदिकार्थ इति ।

अन्त्यवाक्यम्

एक क्रिया पूर्वकस्तेषां सम्वम्ध इति । पारंपर्येण व्यवहितः सम्बन्धः क्रिययोऽनुसाक्षादिति ॥ तदुक्तम् । प्राणालिकस्तु सम्वन्धः कारकाणाङ्क्रियाकृतः । क्रियायाः कारकैरेव साक्षाद्योगोभिधीयते ॥ उपयोगक्रमः समाप्तः ॥ सम्वत् ४७१ श्रावण कृष्णैकादश्याम्वृहस्पतिदिने लिखितमिदं पुस्तकम् ।

कलापसूत्रम्

क्रमाङ्कः प्र. ८२१ विषयाङ्कः २६

ग्रन्थकारः········। नेपालीयं कागतम् । नेवारी लिपिः । पङ्क्तयः ७ । आकारः ७$\frac{१}{४}$×$\frac{३}{४}$ ग्रन्थसंख्या २५० । पत्रसंख्या १६ । अष्टपादपर्यन्तम् ।

आदिवाक्यम्

नमो गणपतये । श्री भवानीशङ्कराभ्यां नमः । सिद्धोवर्णसमाम्नाय । तत्र चतुर्दशादौस्वराः । दश समानाः । तेषां द्वौद्वानन्योन्यस्य सवर्णो । पूर्वोह्रस्वः । परोदीर्घः । स्वरो वर्ण वर्जो (र्गो) नाम । एकारादिनी संध्यक्षराणि । कादीनि व्यञ्जनानि ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुष्पिकावाक्यानि

इति सन्धौ प्रथमपादः ।
" आख्याते द्वितीयपादः ।
" " तृतीयपादः ।
" " चतुर्थपादः ।
" " पञ्चमपादः ।
" " षष्ठपादः ।
" " सप्तमपादः ।
" " अष्टमपादः ।

कातन्त्रधातुवृत्तिः (मनोरमानाम्नी)

क्रमाङ्कः तृ. ३३१ विषयाङ्कः ३०

ग्रन्थकारः रमानाथः । नेपालीयं कागतम् । नेवारी लिपिः । पंक्तयः ६ । आकारः ११×३$\frac{1}{2}$ । ग्रन्थसंख्या २१०० । पत्रसंख्या २०० । चुराद्यन्ता ॥

श्री गुरुमूर्तिर्जयति । सम्यक् प्रणम्य तां वाणीं मानीय सतां वचः । मनोरमा रमानाथः शर्मणा परिनिर्मिता ॥ प्रायेण धातु वैशम्यात् सर्वेषां धूर्णतामता । या तत् क्रियावै प्रभवेत् सैव वृत्तिर्मनोरमा ॥ भूसुरि कृता वृत्तिर्भूयसिसुक्क सुक्तिगः । निश्चेत धातवस्तस्यां नश व्यस्तेन मे श्रमः । योमत्सर प्रथयति प्रथितस्य नाम्ना । हृम्यापी वा निज महत्व समीहयारी ॥ उच्छि-द्यनामा समवीक्ष्यकृतीः समरताात्तस्यवै नश्यति नरां स्वकृतं कृतन्तु ॥ भूसत्तायां ॥ सतो भावाष्ट प्रवृत्तिं वित्तं लत्ता तस्याश्च सिद्धरुपाया अपि यथा क्रिया त्वं तथा वन्ति नभेधानुसंज्ञायाम् ॥

अन्त्यवाक्यम्

वसुरामभुवनगणिते शाके धर्मद्रवीतीरे कातन्त्रधातुवृत्तिर्निमित वै रमानाथः ॥ नव्य माध्यतमि मनोरमा यांती दर्मीवृशं नाववर्णमनुवर्णमीरातास् । साधवः किमिति संश्रयाद्विद्वियन्तिसन्तपर्व मौं क्किम् ।

इति देवगर्कतर्काचार्यात्मज वर्मे कुल प्रसूतः श्रीरमानाथनिर्मितायां कातन्त्र धातुवृत्तौ चुरादि विवरणम् समाप्तम् ।

शाके वाणवियङ्गजैर्विवलितैः पक्षे सिते भाद्र के । सप्तम्यां बुधवासरे शुभदिने कातन्त्रटीकां मुदा । प्रालेखत्सितपक्षके सुमनसः श्रीचक्राजस्य वैः शब्दाद्धिप्रतिपातकां च विदुषां कण्ठा वशाक्त न्यासः ।

कातन्त्रधातुवृत्तिः

क्रमाङ्कः त्रि. २५ विषयाङ्कः ३१

ग्रन्थकार-रमानाथः । नेपालीयं कागतम् । नेवारी लिपिः । पंक्तयः ६ । आकारः १०$\frac{1}{2}$×४$\frac{1}{2}$ । ग्रन्थसंख्या ६०० । पत्रसंख्या ३३ । आद्यन्तखण्डितः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कातन्त्रविवरणपञ्जिका

क्रमाङ्कः प्र. १६०६ विषयाङ्कः ३२

ग्रन्थकारः- उदयः । ताडपत्राणि । नेवारी लिपिः । पंक्तयः ६ । आकारः १२$\frac{३}{८}$×२ । ग्रन्थसंख्या ६.६ । पत्रसंख्या ४४ आदिमध्यखण्ड़िता ।

कातन्त्रविस्तरः

क्रमाङ्कः प्र. ११४६ विषयाङ्कः ३३

ग्रन्थकारः- कर्णदेवोपाध्याय श्रीवर्द्धमानः । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पंक्तयः ६ । आकारः ११×३$\frac{५}{८}$ । ग्रन्थसंख्या १२०० । पत्रसंख्या ८५ । कृत्यप्रकरणान्तः पूर्णः । समयः सं. ५८६ ।

आदिवाक्यम्

श्री गणेशाय नमः । महेश्वरं नमस्कृत्य कुमारं तदनन्तरम् ॥ सुगमः क्रियतेऽस्माभिरयं कातन्त्रविस्तरम् ॥१॥ अभियोगपरापूर्वे भाषायां यत्प्रपेदिरे ॥ प्रायेण तदिहा एस्माभिः परित्यक्तं न किञ्चनम् ॥२॥ सिद्धो वर्णः समाम्नायस्तत्र चतुर्दशादौस्वराः । दशसमानाः तेषां द्वौद्वावन्यरय सवर्णो ॥ अकारऋकारौ च ॥

पुष्पिकावाक्यानि

इतिश्रीमत्कर्णदेवोपाध्यायः श्रीवर्द्धमानविरचिते कातन्त्रविस्तरे प्रथमसन्धिः समाप्तः ॥

" " द्वितीयसन्धिः समाप्तः ॥
" " तृतीयसम्धिः समाप्तः ।
" " चतुर्थसन्धिः समाप्तः ।
" " पञ्चमसन्धिः: समाप्तः ॥
" " प्रथमपादः ।
" " द्वितीयपादः ।
" " तृतीयपादः ।
" " कारके प्रथमं प्रकरणम् ।
" " " द्वितीयं प्रकरणम् ।
" " " तृतीयं प्रकरणम् ।
" " " चतुर्थप्रकरणम् कारकं समाप्तम्

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

,, ,, समासविस्तरे प्रथमं प्रकरणम् ।
,, ,, ,, द्वितीयं प्रकरणम् ॥
,, ,, ,, तृतीयं प्रकरण ॥
,, ,, ,, चतुर्थं प्रकरणम् ॥
,, ,, तद्धिते प्रथमं प्रकरणम् ॥
,, ,, ,, द्वितीयं प्रकरणम् ॥
,, ,, ,, तृतीयं प्रकरणम् ॥
,, ,, ,, चतुर्थ प्रकरणम् ॥
,, ,, ,, पञ्चमं प्रकरणम् ॥
,, ,, ,, षष्ठं प्रकरणम् ॥
,, ,, ,, सप्तमं प्रकरणम् ॥
,, ,, ,, अष्टमं प्रकरणम् ॥
,, ,, ,, नवमं प्रकरणम् ॥
,, ,, ,, दशमं प्रकरणम् ॥
,, ,, आख्यातविस्तरे प्रथमं प्रकरणम् ॥
,, ,, ,, द्वितीयं प्रकरणम् ॥
,, ,, ,, तृतयं प्रकरणम् ॥
,, ,, ,, चतुर्थंप्रकरणम् ॥
,, ,, ,, पञ्चमं प्रकरणम् ॥
,, ,, ,, षष्ठं प्रकरणम् ॥
,, ,, ,, सप्तमं प्रकरणम् ॥
,, ,, कृद्विस्तरे प्रथमं प्रकरणम् ॥
,, ,, ,, द्वितीयं प्रकरणम् ॥
,, ,, ,, तृतीयं प्रकरणम् ॥
,, ,, ,, चतुर्थ प्रकरणम् ॥
,, ,, ,, पञ्चम प्रकरणम् ॥
,, ,, ,, षष्ठं प्रकरणम् ॥

इति श्रीकर्णदेवोपाध्याय श्रीवर्द्धमानविरचिते कातन्त्रविस्तरे कृत्प्रकरणे षष्टपादः समाप्तः संवत् १५८६ समय कार्तिकस्तृतीया गुरौ ॥

कातन्त्रविस्तरः

क्रमाङ्कः प्र. १५४६

विषयाङ्कः ३४

ग्रन्थकारः कर्णदेवोपाध्यायः श्रीवर्द्धमानः । मध्यदेशीयं कागतम् । देवनागरी लिपिः पंक्तयः ७। आकारः १० ३/८×३ १/८ ग्रन्थसंख्या १००० । पत्रसंख्या ७३ । तृतीयपादान्तःपूर्णः । समयः सं. १६०४।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कातन्त्रविस्तरः (कातन्त्रव्याख्या)

क्रमाङ्कः प्र. १३५१ विषयाङ्कः ३५

ग्रन्थकारः श्रीवर्द्धमानमिश्रः। नेपालीयं कागतम्। नेवारी लिपिः। पंक्तयः ८। आकारः २२१/८×१३/४। ग्रन्थसंख्या १२००। पत्रसंख्या ५४। ३ पादान्तः पूर्णः।

कातन्त्रव्याख्या

क्रमाङ्कः प्र, ६७६ विषयाङ्कः ३६

ग्रन्थकारः । नेपालीयं कागतम्। नेवारी लिपिः। पंक्तयः ६। आकारः ७३/४×२१/२ ग्रन्थ-संख्या १२५। पत्रसंख्या ११। पञ्चसन्धिप्रकरणान्ता।

आदिवाक्यम्

ॐ नमः शिवाय। देवदेवं प्रणम्यादौ सर्वज्ञं सर्वदर्शिनम्। कातन्त्रस्य प्रवक्ष्यामि व्याख्यानं शार्व वर्मिकम्। सिद्धौवर्णः समाम्नायः। अकाराद्याक्षरः पाठक्रमः॥ अ आ इ ई उ ऊ ऋ ॠ ए ऐ ओ औ अं अः॥ क ख ग घ ङ। च छ ज झ ञ।

पुष्पिकावाक्यम्

इति सन्धौ प्रथमपादः।
" " द्वितीयपादः।
" " तृतीयपादः।
" " चतुर्थपादः।
" " पंञ्चमपादः।

समाप्तोऽयं स्वल्पमनः सयुक्तिपञ्च सन्धिः॥

कातन्त्रवृत्तिपञ्जिका

क्रमाङ्कः तृ. ७१७ विषयाङ्कः ३७

ग्रन्थकारः-त्रिलोचनदासः। नेपालीयं कागतम्। देवनागरी लिपिः। पंक्तयः ७। आकारः १३१/२×३१/४। ग्रन्थसंख्या । पत्रसंख्या २७। पंचमपादान्ता पूर्णा। समयः शा. के. १५८६।

आदिवाक्यम्

ॐ नमो गणेशाय। प्रणम्य सर्वकर्तारं सर्वज्ञं सर्ववेदिनम्। सर्वीयं सर्वगं सर्वं सर्वदेवनम-स्कृतम्॥ दुर्गसिंहोक्त कातन्त्र वृत्तिदुर्गपदान्यहम्। विवृणोमिमथा प्रज्ञमज्ञसज्ञात हेतुता॥ तत्रादौ तावदिष्टदेवता प्रतिपादनार्थं शास्त्रस्य संवन्धप्रयोजनाभिधानार्थं च वृत्तिकारः श्लोकमेकं चकार देवदेवमित्यादि॥ ननु च विप्रतिसिद्धमेतत्॥ दुर्गसिंहल्वेष वृत्तिकरणे कृताभिनिशस्तत्कथ

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रस्तुत एवेष्टदेवता। स्तवेप्रवृत्तः। नचैतद्वक्तव्यम्। अभिमतदेवता नमस्कार सभूद्भतधर्माग्नि विघ्नमभिप्रेतसिद्धिरिति। कथं व्यभिचारोपलब्धेः। तथाहिकादम्वर्यादौ सकलदेवता नमस्कार संभवेऽप्यभिप्रेतस्य सिद्धिरुपो लभ्यते।

पुष्पिकावाक्यानि

इति त्रिलोचनसंहितायां कातन्त्रवृत्तिपञ्जिकायां सन्धौ प्रथमपादः।
" " " द्वितीयपादः।
" " " तृतीयपादः।
" " " चतुर्थपादः।
" " " पञ्चमपादः।

शकाब्दे १५८६ प्रतिलिखत्। नो अत्र नन्वत्र पदे कथं भोनोलोप इत्यनेन। यतो निमित्तास्य निमिभावे विकार एषः। कथितः सुधीरैः सुधीभिः शोधनीयं वंगाल्याचरतोऽभिसारितमेतत् नैपाले विधुवाणरत्नकलितेऽद्रीभे भवेत्। वैक्रमे शाकेत्ताभुगशैलभूमिमिलिते चोर्जे च राकातिथौ। वंगाच्चरतोऽधिसारिततमिदं कातन्त्रटीकाभिधः तत्सप्तप्रतिवार्षिकेन मुनिराडाज्ञापरेण मुना॥

कातन्त्रवृत्तिविवरणपञ्जिका

क्रमाङ्कः तृ. ३६७ विषयाङ्कः ३८

ग्रन्थकारः-त्रिलोचनदासः। ताड पत्राणि। देवनागरी लिपिः। पंक्तयः ५। आकारः १२३/४×१३/४। ग्रन्थसंख्या । पत्रसंख्या ७६। पूर्णा (कृद्भागात्मक) समयः-ल. सं. १५६।

आदिवाक्यम्

ॐ नमो गणपतये। वृत्तादिवदिति। वृत्तादय इव वृत्तादिवत्। यथा वृत्तादयः शब्दा रुढा लोके विशिष्ट विषय तया प्रसिद्धास्तथा ऽमीकृतः कृदन्तास्वपि शब्दा इति कृत्वा कृतिना नकृताः। प्रस्तावादिह कृति पण्डितः शर्ववर्म नाव्यते सर्ववर्ममा कृल्लक्षणं नकृतमित्यर्थः। तथा चाहु ननिका लक्षणाहि कृत्ताद्धितसमासा इति॥ अभिधानं ल शब्दपर्व लक्षणमेष्यं नियामकं नसूत्रमित्यर्थः। केन नाम कृत्वा इत्याह। कात्यायनेन, वररूचिना, विगता वुद्धिर्येषान्ते विवुद्धयस्तेषां प्रतिवुद्धिः प्रतिवाद्यस्तदर्थम्। अन्यथा प्रकृतिप्रत्ययविभागेषु मदवियो स्तह्यं स्तमिति भावः।

पुष्पिका वाक्यानि

इति त्रिलोचनदासविरचितायां कातन्त्रविवरणपञ्जिकायां कृत्सु प्रथम पादः।
" " " द्वितीयपादः।
" " " तृतीयपादः।
" " " चतुर्थपादसमाप्तः।

ल. सं. १५६ फाल्गुनवादि २ रवौ॥ ठक्कुरसिम्रजातिना लेखि।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कातन्त्रव्याकरणम्

क्रमाङ्कः प्र. १०४२ विषयाङ्कः ३६

ग्रन्थकारः सर्ववर्मा । नेपालीयं कागतम् । नेवारी लिपिः । पंक्तय ६ । आकार ११$\frac{3}{4}$×२$\frac{1}{2}$ । ग्रन्थसंख्या १२०० । पत्रसंख्या ११४ मध्यखण्डितम्

आदिवाक्यम्

ॐ नमः सरस्वत्यै । वागर्थं दलगन्धाढ्या सौरभ्य मधु गर्भिणी । मानसं मे विभूष्यास्तां भारती पद पद्मीनी । नानाप्रकरणैः शुद्धं संक्षिप्तमपिवाततं स्कन्धेन दर्शिवो देशं कातन्त्रमिहराजते ॥ कुमारं सर्ववर्माणं कात्या………………………अत परं अस्पष्टम् ।

कातन्त्रव्याकरणस्य दौर्गसिंहवृत्तिः ।

क्रमाङ्कः प्र. १३८८ विषयाङ्कः ४०

ग्रन्थकारः—दुर्गसिंहः । नेपालीयं कागतम् । नेवारी लिपिः । पंक्तय ७ । आकारः ९$\frac{3}{4}$×३$\frac{1}{2}$ । ग्रन्थसंख्या । पत्रसंख्या २३१ । पूर्णप्रायः । समयः ने. सं. ७०७ ।

आदिवाक्यम्

ॐ नमः श्री विश्वेश्वराय । देवदेवं प्रमाम्या दौ सर्वज्ञ सर्वदर्शिनम् । कातन्त्रस्य प्रवक्ष्यामि व्याख्यानं शार्ववर्मिकम् ॥ सिद्धोवर्ण समाम्नाय । सिद्धः खलु वर्णानां समाम्नायो वेदितव्यः ॥ नपुनरन्यथो यदष्टव्य इत्यर्थः । सिद्धशब्दोऽत्र नित्यार्थो निष्टान्नार्थः प्रसिद्धार्थो वा यथा सिद्ध-माकाशं सिद्धमन्नं काम्पिल्लः सिद्ध इति वर्णा अकादयस्तेषां समाम्नायः पाठक्रमः ॥ तत्र चतुर्दशादौ स्वरा ॥ तस्मिन् वर्णसमाम्नाय विषये, आदौ ये चतुर्दशवर्णास्ते स्वर संज्ञा भवन्ति । अ. आ. इति ॥

अन्त्यवाक्यम्

आदि शब्दः समीप वचनः पदस्याद्योर्यकारवकारयोः समीपे वृद्धिर्न भवति । तयोश्चादौ वृद्धिरागमो भवति ॥ णकाराणुवन्धे तद्धिते स्थानेन्वरतस्या यकारस्यैकारः वकारस्यौकारः व्यसने भवो वैयसनः, व्युदयस्यायत्यं वैयुदयः । श्वस्पापस्यं सौवश्विः । व्याकरणं वेत्यधीते वा वैयाकरणः । व्योसमीप इति किंदाध्यश्विः माध्वश्विः तन्निमित्तो वृद्धिर्नस्यादागमः । पुनर्वृद्धिग्रहणं वर्द्धनाद्वद्धिरिति ज्ञापनार्थं क्वचिदधिकाराद्वारादादीनाश्च यदा द्योरपि द्वौ वारिकः द्वार्द्धवपाल वृद्धिप्रतिषेधाविति वृद्धिरागम सस्वदुगमन सत्य श्रादु मृद्धिश्वनस्व. एवमन्येप्यनुसर्तव्याः ।

पुष्पिकावाक्यानि

इति दौर्गसिंहवृत्तौ सन्धौ प्रथमः पादः ।
" " " द्वितीयः पादः ।
" " " तृतीयः पादः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

,,	,,	,,	चतुर्थः	पादः ।
,,	,,	,,	पञ्चमः	पादः ।
,,	,,	कृत्सु	प्रथमः	पादः ।
,,	,,	,,	द्वितीयः	पादः ।
,,	,,	,,	तृतीयः	पादः ।
,,	,,	,,	चतुर्थः	पादः ।
,,	,,	,,	पञ्चमः	पादः ।
,,	,,	,,	षष्ठमः	पादः ।
,,	,,	आख्याते	प्रथमः	पादः ।
,,	,,	,,	द्वितीयः	पादः ।
,,	,,	,,	तृतीयः	पादः ।
,,	,,	,,	चतुर्थः	पादः ।
,,	,,	,,	पंचमः	पादः ।
,,	,,	,,	षष्टः	पादः ।
,,	,,	,,	सप्तमः	पादः ।
,,	,,	,,	अप्तमः	पादः ।
,,	,,	,,	अष्टमः	पादः ।
,,	,,			

चतुष्टये तद्धितपादः समाप्तः

कातन्त्रव्याकरणस्य–दौर्गसिंहवृत्तिः

क्रमाङ्कः प्र. १४०६ विषयाङ्कः ४१

ग्रन्थकारः दुर्गासिंह । नेपालीयं कागतम् । देवनागरी लिपिः । पंक्तयः६। आकारः १०$\frac{१}{२}$ × ३$\frac{४}{८}$ ग्रन्थसंख्या ६२५। पत्रसंख्या ७३। मध्यान्तखण्डितः ।

कातन्त्रव्याकरणस्य दौर्गसिंहवृत्तिः

क्रमाङ्कः प्र. १४०६ विषयाङ्कः ४२

ग्रन्थकारः दुर्गसिंहः । नेपालीयं कागतम् । देवनागरी लिपिः । पंक्तयः ५।७। आकारः ६$\frac{७}{८}$×२$\frac{३}{४}$। गून्थसंख्या ४५०। पत्रसंख्या ४३। आदिखण्डितः । समयः सं. १५५४

कातन्त्रव्याकरणस्य–दौर्गसिंहवृत्तिः

क्रमाङ्कः प्र. १४०३ बिषयाङ्कः ४३

ग्रन्थकारः दुर्गसिंह । नेपालीयं कागतम् । नेवारी लिपिः । पंक्तय; ७। आकार. १५ × ३$\frac{३}{४}$ । गून्थ संख्या १३००। पत्रसंख्या ७२। मध्ये २ पत्रखण्डितः। समय ने. सं. ७६१ चैत्रकृष्ण, द्वादशी पूर्व भाद्र, ऐन्द्र, आदित्यवार थ्व कुन्हु आलम्भ शुभ ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कातन्त्रस्य–दौर्गसिंहवृत्तिः

क्रमाङ्कः प्र १५२८ विषयाङ्कः ४४

ग्रन्थकारः–दुर्गसिंहः । नेपालीयं कागतम् । नेवारी लिपिः । पंक्तयः ५ आकारः ८३/४×२३/४ । ग्रन्थ..ख्या १४० । पत्रसंख्या १५ । पञ्चमपादान्तः ।

कातन्त्रव्याकरणस्य–परिभाषावृत्तिः

क्रमाङ्कः तृ ३८३, विषयाङ्कः ४५

ग्रन्थकार··· ·····। ताड पत्राणि । नेवारी लिपिः । पंक्तयः ७ । आकारः १३१/८×१७/८ । ग्रन्थसंख्या १२०० । पत्रसंखया ३३ । अपूर्णः । समयः ने. सं.५४५

कातन्त्रसूत्रम्

क्रमाङ्क प्र १४७३ विषयाङ्कः ४६

ग्रन्थकारः शर्व वर्मा । ताड़पत्राणि । नेवारी लिपिः । पंक्तयः ५ । आकारः ६१/२×१७/८ । ग्रन्थ सख्या । पत्रसंख्या ।

कारकचक्रम्

क्रमाङ्कः तृ. ४३५ विषयाङ्कः ४७

ग्रन्थकारः–वररुचिः । नेपालीयं कागतम् । देवनागरी लिपिः । पंक्तयः १० । आकारः १?३/४×३/२ । ग्रन्थसंख्या २५ । पत्रसंख्या २ । पूर्णम् । समयः शाके १७६७

आदिवाक्यम्

श्री गुरुगणेशाभ्यां नमः । प्रयोज (ग) मिच्छता ज्ञातुं ज्ञेयं कारणमादितः । संज्ञया षड्विधं भेदा स्त्रयोविंशतिधा पुनः ॥१॥ तत्र पञ्चविधः कर्ता कर्मसप्तविधं भवेत् । करणं द्विविधं चैव सप्रधानं त्रिधामतम् । अपादानं द्विधा चैव तथाधारश्चतुर्विधः ॥ करोति कारकं सर्वं तत्स्वातन्त्र्य विवक्षया ॥ तत्र कर्तर्य्यभिहिते प्रथमैव विधियते ॥ तृतीया चाथवा षष्ठी स्मृता नभिहिते द्विधा ॥४॥

अन्त्यवाक्यम्

वर्तमाने तु निर्देशे वर्तते शतृशानचौ ॥ तव्यसत्संज्ञका ख्यात्र समासो नतु सिद्धति ॥ ग्रन्थनादाशये नाहं श्लोकानां विंशतेः पदार्थभारमुद्वोढुं प्रभवेयं भवे भवे ॥ इति श्रीवररुचि विरचितं कारकचक्रं समाप्तम् शुभम् ॥ शाके १७६७ श्रावणकृष्णे शिवे भौमे कारकचक्रं देवदत्तपन्तेन लिखितं शुभम् । भूयात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कारकवादार्थः

क्रमाङ्कः तृ. ३२७ विषयाङ्कः ४८

ग्रन्थकारः-जयरामः। नेपालीयं कागतम्। देवनागरी लिपिः। पंक्तयः ११ आकारः ६$\frac{3}{8}$×४। ग्रन्थसंख्या । पत्रसंख्या २४। पूर्णः समयः ने. सं. ८८३

आदिवाक्यम्

श्रीपङ्क्तिरथसूनवे नमः। नत्वा शम्वोः पदां भोजे जयरामः समासतः। करोति कारकव्याख्या-निहसंख्या वदाम्वुदे ॥ तत्र कारकानि कर्तृ कर्मकरणसंप्रदानापादानाधिकरणानि षट्। तत्वं च क्रिया निमित्तत्वं चैतस्य तण्डुलं पचतीत्यादौ संवन्धिनि चैत्रादावतिव्याप्तिः ॥

अन्त्यवाक्यम्

तथाच यस्य धर्मेण धर्मान्तरं निरुक्त स्वसमानाधिकरण्येन प्रतिपाद्यते तत्र सप्तमी सूत्रार्थ, इत्यदोष इति समाप्तः ॥ इति श्रीमहामहोपाध्यायः श्रीयुतजयरामन्यायपञ्चाननभट्टाचार्य विरचितः कारकवादः समाप्तोऽभूत्।

वचन्कू भवनीश्वरो नेमपाल समाप्त स्तवदागाढके वाहुलेञ्जे कुलानां मितद्रुः पदानां तरिश्च-मतः कारकाणि मफाणी द्विवादम्। गुणनागवसावब्दे कारकाख्यमली लिखत्। अम्वकीय तिथौ श्रीमद्भवानीशङ्करो मुदा।

काशीका

क्रमाङ्कः प्र. ४६४ विषयाङ्कः ४९

ग्रन्थकारः । ताडपत्राणि। मैथिली लिपिः। पंक्तयः ५। आकारः १३$\frac{3}{4}$।१$\frac{3}{4}$। ग्रन्थसंख्या ... पत्रसंख्या ३२। पूर्णा। लक्ष्मण सं. ३५८। सप्तमाध्यायस्य द्वितीयपादमात्रम्।

आदिवाक्यम्

ॐ नमो रामाय। सिचिवृद्धि परस्मैपदेषु। परस्मैपदपरे सिचिपरत इगत्ताङ्गस्य वृद्धिर्भवति। अनैषित् अनैषीत् अलावीत्। अपाठीत्, अकार्षीत्। अहार्षीत्। अन्तरङ्गमपि गुणमेषां वृद्धिर्व-चनात् वाधते।

अन्त्यवाक्यम्,

किचि च। ११८॥ किति च तद्धिते परतोऽङ्गस्य। चामादेरचः स्थाने वृद्धिर्भवति। नडादिभ्यः फक्। लाडादय। चारायणः प्राग्वहतेष्ठक्। आक्षिकः। शालाकिकः। इति काशिकायां वृत्तौ सप्तमाध्यायस्य द्वितीयः पादः।

काशिकाविवरणपञ्जिकान्यासः

क्रमाङ्कः प्र. १५३७ विषयाङ्कः ५०

ग्रन्थकारः जितेन्द्रपादः। ताडपत्राणि। मैथिली लिपिः। पत्तयः ५। आकारः १२$\frac{3}{8}$×१$\frac{3}{8}$। ग्रन्थसंख्या १३००। पत्रसख्या ६३। प्रथमाध्याय द्वितीयपादमात्रम्। समयः ल सं. २७६

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुष्पिकावाक्यम्

इति श्रीबोधिसत्वदेशीयाचार्य जितेन्द्रपाद बुद्धिपादविरचितायां काशिकाविवरणपञ्जिकायां प्रथमाध्यायस्य द्वितीयपादः समाप्तः। लक्ष्मण संवत् ३७६

काशिकावृत्तिः

क्रमाङ्कः प्र. ४६८ विषयाङ्कः ५१

गृन्थकारः । ताडपत्राणि । मैथिली लिपिः । पंक्तयः ४ । आकारः १२३⁄४×१५⁄६ । गृन्थसंख्या .. पत्रसंख्या ६२। अपूर्णः।

आरम्भवाक्यम्

ॐ गणपतये नमः ।। गाङकुटादिभ्योऽञ्णिन्ङित्। आदेशोऽयम् । गाङिति इङादेशो गृह्यते। न गाङ्गताविति। ङकारस्यानन्यार्थत्वात्, । कुटादयोऽपि कुटकौटिल्य इत्येतदारभ्य यावत् कुङ् शब्दे इति। एभ्यो गांकुटादिभ्यः परेऽञ्णितः प्रत्ययाङ्तिो भवन्ति। ङिद्वद्भवन्तीत्यर्थः।। गाङः अध्यगीष्ट, अध्यगीषाताम् । अध्यगीषत, । कुटादिभ्यः कुटिता, कुटितुम्, कुटितव्यम्।

काशिकावृत्तिविवरणपञ्जिका

क्रमाङ्कः च. २१६ विषयाङ्कः ५२

ग्रन्थकारः । ताड़पत्राणि। पूर्व लिच्छवी लिपिः । पंक्तय ७। आकारः २१३⁄४×२ । गृन्थसंख्या १६६३८। पत्रसंख्या ४००। आद्यन्तखण्डिता।

कृद्भाष्यम्

क्रमाङ्कः प्र. १६६३ विषयाङ्कः ५३

ग्रन्थकार.........। ताडपत्राणि। पूर्वलिच्छवी लिपिः। पंक्तयः ५। आकारः २२×१३⁄४। ग्रन्थसंख्या । पत्रसंख्या १३ प्रकीर्णम्।

कृद्वृत्तिविवरणपञ्जिका

क्रमाङ्कः— तृ ५१३ विषयाङ्कः ५४

ग्रन्थकारः— त्रिलोचनदासः। मध्यदेशीयं कागतम्। देवनागरी लिपिः। पंक्तयः : आकारः । ग्रन्थसंख्या । पत्र संख्या ३४। आद्यन्तखण्डिता।

कौमुदीविलासः (सिद्धान्तकौमुदीव्याख्या)

क्रमाङ्कः तृ ३२८ विषयाङ्कः ५५

ग्रन्थकार...................। टीकाकारः— भास्करभट्टः । नेपालीयं कागतम् । देवनागरी लिपिः । पंक्तयः १६ । आकारः ११३⁄४×४८ । ग्रन्थसंख्या २३०० । पत्रसंख्या ८४ । अव्यदाद्यन्तः । मध्ये खण्डितः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आदिवाक्यम्

श्री गणेशायनमः । अथकौमुदीविलासो लिख्यते ॥ धातुर्लीलामावन्ती मुखाब्जै दोर्भि विष्णो लोचनैः शङ्करस्य ॥ करस्यमूर्तिस्तथास्त प्र गांगेय काया सौरीमाया कापिया दया यात् ॥ मुनि सिद्धान्तसुधामय कौमुद्यामप्ययेतद्दोषायाम ॥ विद्वन्मानसकमलं भास्कर कृतितः प्रमोद मादत्ताम । रमयति शाद्बिकरसिकं कौमुद्या किल मनोरमा कलिता ॥ तद्वद्विच्चक्र रमयिष्य ति में विलास इह किं नो ॥

पुष्पिका वाक्यनि

इति कौमुदीविलासे स्थानप्रयत्नविवेक समाप्तः
" " अच् सन्धिः
" " हल सन्धिः
" " विसर्गसन्धिः ।

इति श्रीमदग्निहोत्रभास्करोन्नीते सिद्धान्तकौमुध्याविलासे सन्धयः समाप्तः ।

इति श्रीमत्काश्ययान्वयसंभव श्रीमदग्निहोत्रि कुलतिलकायमानहरिभट्टसून् श्रीमदा-पाजिभट्टतनुजन्मभास्करकृते वैयाकरणसिध्दान्तकौमुदीविलासे ऽव्यया मार्थाः । श्री ठाकुर प्रसादश्याक्षरमिदम् ।

शरगजनागे शुचिशितपक्षे जलजतिथ्थां लिखनसमाप्तिः । शुभम् ।

गणपाठः

क्रमाङ्कः प्र १६०६ विषयाङ्क ५६

ग्रन्थकार..........। नेपालीयं कागतम् । देवनागरी लिपिः । पंक्तयः ।आकारः ।
ग्रन्थसंख्या । पत्रसंख्या ७ । अपूर्णः ।

आदिवाक्यम्

ॐ स्वस्ति श्रीगणेशाय नमः । येनाक्षरसमान्मयमधिगम्यमहेश्वरात् ॥ कृत्स्नं ब्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥१॥ सर्वादिनि सर्वनामानि । सर्वं, विश्व, उभ, उभय, इतर, त्वत्, त्व. नेम, सम सिम. पूर्व परावरदक्षिणोत्तराधराणिव्यवस्थामसंज्ञायाम् । अन्तरं वहिर्यो-गोपसंख्यानयोः ॥

गणपाठः

क्रमाङ्कः च. १५३ विषयाङ्कः ५७

ग्रन्थकारः । मध्यदेशीयं कागतम् । देवनागरी लिपिः । पंक्तयः ६ । आकारः ६$\frac{३}{४}$×४ । ग्रन्थसंख्या ५५० । पत्रसंख्या ३१ । अष्टमाध्यायन्तः । समयः सं. १८०८ ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चान्द्रव्याकरणम्

क्रमाङ्कः प्र. १५८३ विषयाङ्कः ५८

ग्रन्थकारः चन्द्रः। ताड़पत्राणि। नेवारी लिपिः। पंक्तयः ६। आकारः ११½×२। ग्रन्थसंख्या ५४०। पत्रसंख्या १२। आदिमध्यखण्डितम्। समयः ने. सं. ३७७

पुष्पिका

चान्द्रव्याकरणे षष्ठोऽध्यायः समाप्तः श्रेयोऽस्तु संवत् ३७७। कार्तिककृष्णचतुर्थ्यां मङ्गलवासरे शुभमस्तु।

चान्द्रव्याकरणम्

क्रमाङ्कः प्र. १५८३ विषयाङ्कः ५९

ग्रन्थकारः चन्द्रः। ताडपत्राणि। नेवारी लिपिः। पंक्तयः ६। आकारः ११×१७/८। ग्रन्थसंख्या २५०। पत्रसख्या १७। प्रकीर्णम्।

चान्द्रव्याकरणम्

क्रमाङ्कः प्र. १६०८ विषयाङ्कः ६०

ग्रन्थकारः। ताडपत्राणि। नेवारी लिपिः। पंक्तय. ७। आकारः १२७/८×२१/४। ग्रन्थसंख्या २०००। पत्रसंख्या ७२। द्वितीयाध्याय द्वितीयपादान्तम्।

चान्द्रव्याकरणम्

क्रमाङ्कः प्र. १६९२ वियाषङ्कः ६१

ग्रन्थकारः। ताड़पत्राणि। पूर्वलिच्छबि लिपिः। पंक्तयः ७। आकारः २१६/७×१७/८। ग्रन्थसंख्या ५८०। पत्रसंख्या १४। प्रकीर्णम्।

चान्द्रव्याकरणम्

क्रमाङ्कः तृ ६७९ विषयाङ्कः ६२

ग्रन्थकारः। ताडपत्राणि। नेवारी लिपिः। पंक्तयः ६। आकारः २३३/७×२१/७। ग्रन्थसंख्या ६०००। पत्रसंख्या १५८ आदिमध्यखण्ड़तम्। सनयः सं. २७६ प्रथम पौषकृष्णदिन्याचतुर्थ्यां आनन्ददेवस्य विजयराज्ये।

चान्द्रव्याकरणम्

क्रमाङ्कः-च. २६ विषकाङ्कः ६३

ग्रन्थकारः-धर्मदासः, ताड पत्राणि। पूर्वलिच्छबी लिपिः। पंक्तयः ६। आकारः २१×२। ग्रन्थसंख्या । पत्रसंख्या । जीर्णप्राया।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुष्पिका:-

धर्मदासकृतायां वृत्तौ प्रथमस्य तृतीयः पादः समाप्तः ।

चान्द्रव्याकरणम् (वृत्तिसहितम्)

क्रमाङ्कः प्र. १५५८ विषयाङ्कः ६४

ग्रन्थकारः-चन्द्रः । वृत्तिकारः-धर्मदासः । ताडपत्राणि । नेवारी लिपिः । पंक्तयः ७ । आकारः २३$\frac{६}{८}$ × १$\frac{३}{८}$ । ग्रन्थसंख्या ६४०० । पत्रसंख्या १४७ । समयः-ने. सं. ४४१ ।

चान्द्रव्याकरणम्

क्रमाङ्कः च. ३११ विषयाङ्कः ६५

ग्रन्थकारः-चन्द्रः । ताड पत्राणी । प्राचीन देवनागरी लिपिः । पक्तयः ६ । आकारः २१×१$\frac{१}{२}$ । ग्रन्थसंख्या । पत्रसंख्या ५५ ।

चान्द्रव्याकरणोपसर्गवृत्तिः

क्रमाङ्कः प्र १०७६ विषयाङ्कः ६६

ग्रन्थकारः । ताडपत्राणि । नेवारी लिपिः । पंक्तयः ६ । आकारः १०$\frac{१}{२}$×२ ग्रन्थसंख्या ५५ । पत्रसंख्या ४ । आदिखण्डिता । । समयः ने. सं ५४१ ।

छाया (भाष्यप्रदीपोद्योतव्याख्या)

क्रमाङ्कः द्वि १६१ विषयाङ्कः ६७

ग्रन्थकारः- वैद्यनाथः पायगुण्डाः । नेपालीयं कागतम् । देवनागरी लिपिः । पंक्तयः ११ । आकारः १६$\frac{१}{२}$×७$\frac{१}{२}$ । ग्रन्थसंख्या ५०० पत्रसंख्या १४५। अपूर्णा ।

आदिवाक्यम्

श्री गणेशाय नमः ॥ पतञ्जलिमुमाकान्तं कमनीयविभूषणम् ॥ सहस्त्रवदनां भोजसुवासित जगद्गणम् ॥१॥ योगिहृत्पद्मवसनं मलमात्रबिदारणम् ॥ स्फोटाविघं स्फोटभूलं रुपकारण कारणम् ॥२॥ वैद्यनाथः पायगुण्डो ध्यात्वा परं गुरुम् ॥ भाष्यप्रदीप सूद्योतान् व्याचष्टे गूढ संविदे ॥३॥ शास्त्रनिर्णायकं न्यायकलापं मुनिसत्तमः । सूत्ररुपेण कुर्वन्ति शिवस्यैवाज्ञयैवतु ॥४॥ अल्पाक्षरमसं दिग्धं सारवद्विश्वतोमुखम् । अस्तोभमनबद्यं च सूत्रं सूत्रविदो विदुः ॥५॥ मुनयश्च मनुष्याश्च प्रसादा देव शूलिनः । सूत्रव्याख्याँ प्रकुर्वन्ति वार्तिकानां स्वरुपतः ॥६॥ उक्तानुक्त दुरुक्तानाँ चिन्ता यत्र प्रवर्तते ॥ त ग्रन्थं वार्तिक प्राहु ज्ञामनीषिभिः ॥७॥

पुष्पिकावाक्यम्

इति श्रीमत्पापगुण्डोपाख्य वैद्यनाथंकृते भ्याष्यादिव्याख्याने प्रथमस्य प्रथमे प्रथमान्हिकम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तिङन्तव्याकरणम्

क्रमाङ्कः- प्र ११५१ विषयाङ्कः ६८

ग्रन्थकारः मेदिनीकरः। ताडपत्राणि। मैथिली लिपिः। पंक्तयः ५। आकारः १३×२। ग्रन्थसंख्या ६०० । पत्रसंख्या ४० । पूर्णप्रायम् । जिर्णम् ।

तिङन्तव्याकरणम्

क्रमाङ्कः प्र. १६४७ विषयाङ्कः ६९

ग्रन्थकारः मेदिनीकरः। ताड़पत्राणी। मैथिली लिपिः। पंक्तयः ५। आकारः $१५\frac{१}{८}\times१\frac{७}{८}$। ग्रन्थ संख्या २००० । पत्रसंख्या ८६ । आद्यन्तखण्डितम् ।

तिङभेदः
(अख्यातविचारो वा)

क्रमाङ्कः प्र १६४५ विषयाङ्कः ७०

ग्रन्थकार.........। ताडपत्राणि। नेवारी लिपिः। पंक्तयः ७। आकारः $११\frac{१}{२}\times२$। ग्रन्थसंख्या २०० । पत्रसंख्या २०। पूर्णः ।

दशधातुनिरुपणम्

क्रमाङ्कः तृ. ७२८ विषयाङ्कः ७१

ग्रन्थाकारः । नेपालीयं कागतम् । नेवारी लिपिः। पंक्तयः ७। आकारः $८\frac{३}{४}\times३\frac{३}{४}$। ग्रन्थ-संख्या ४००। पत्रसंख्या ४१। पूर्णम् ।

आदिवाक्यम्

ॐ भवानी शङ्कराभ्यां नमः ॥ धातुः परस्मैपदी अकर्मकः॥ वर्तमानायां॥ भवति भवतः भवन्ति। भवसि। भवथः भवथ। भवामि । भवावः। भवामः॥ भावे॥ भूयते, सप्तमी,

अन्तवाक्यम्

चिन्तयिष्यमाणः तृच, चिन्तयिता वुण् चिन्तकः निष्टा चिन्तितः। चिन्तियाल् युठ चिन्तनं अटं, चिम्ता, य्, चिन्ता, इति दशधातवः समाप्ताः॥

दुर्घटवृत्तिव्याकरणम्

क्रमाङ्कः प्र. ४६८ विषयाङ्कः ७२

ग्रन्थकारः सरणदेवः। ताडपत्राणि। मैथिली लिपिः। पंक्तयः ५। आकारः $१४\frac{३}{४}\times१\frac{७}{८}$। ग्रन्थ-संख्या १५००। पत्रसंख्या ६८। अपूर्णम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आदिवाक्यम्

नत्वा सरणदेवेन सर्वज्ञज्ञानहेतवे।

पुष्पिका

इति दुर्घटवृत्तौ सप्तमः पादः समाप्तः

दौर्गसिंहवृत्तिः

क्रमाङ्कः प्र. १८२ विषयाङ्कः ७३

ग्रन्थकारः दुर्गसिंहः। नेपालीय कागतम्। वङ्गाली लिपिः। पंक्तयः ६। आकारः ११$\frac{1}{2}$×४। ग्रन्थसंख्या ५००। पत्रसंख्या २६। प्रकीर्णपत्राणि।

दौ (दु) र्गसिंहवृत्तिः

क्रमाङ्कः प्र. ४३१ विषयाङ्कः ७४

ग्रन्थकारः दुर्गसिंहः। नेपालीयं कागतम्। नेवारी लिपिः। पंक्तयः ८। आकारः ११$\frac{1}{2}$×३$\frac{1}{4}$। ग्रन्थसंख्या ६८४। पत्रसंख्या ४१। द्वितीयपादपर्यन्ताः।

दौ (दु)र्गसिंहवृत्तिः

क्रमाङ्कः प्र. १३५१ विषयाङ्कः ७५

ग्रन्थकारः दुर्गसिंहः। नेपालीयं कागतम्। नेवारी लिपिः। पंक्तयः ६। आकारः १३$\frac{1}{2}$३$\frac{1}{4}$। ग्रन्थसंख्या ५००। पत्रसंख्या १८। अपूर्णः।

दौ (दु) र्गसिंहवृत्तिः

क्रमाङ्कः प्र. १३५१ विषयाङ्कः ७६

ग्रन्थकारः दुर्गसिंहः। नेपालीयं कागतम्। नेवारी लिपिः। पंक्तयः ६। आकारः १३$\frac{1}{4}$×३$\frac{1}{2}$। ग्रन्थसंख्या २००। पत्रसंख्या १३। पञ्चसन्ध्यन्तापूर्णा।

दौर्गसिंहवृत्तिः

क्रमाङ्कः प्र. १३८८ विषयाङ्कः ७७

ग्रन्थकारः-दुर्गसिंहः। नेपालीयं कागतम्। नेपाली लिपिः। पंक्तयः ७। आकारः ६$\frac{3}{8}$×३$\frac{1}{2}$।

ग्रन्थसंख्या ३४००। पत्रसंख्या २३१। पूर्णप्राया। समयः ने. सं. ७०७। आश्विनशुक्लप्रतिपद्यां तिथौ शिववर्मण लिखितं। संपूर्णजातम्।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दौर्गसिंहवृत्तिः

क्रमाङ्कः प्र. १५१६ विषयाङ्कः । ७८

ग्रन्थकारः-दुर्गसिंहः । वस्त्रपत्रम् । देवनागरी लिपिः । पंक्तयः २१ । आकारः ६$\frac{3}{2}$ × ४$\frac{1}{2}$ ग्रन्थ-संख्या २००। पत्रसंख्या ४० मध्यखण्डितः ।

दौर्गसिंहवृत्तिः

क्रमाङ्कः प्र १५२८ विषयाङ्कः ७९

ग्रन्थकारः-दुर्गसिंहः । नेपालीयं कागतम् । नेवारी लिपिः । पंक्तयः ५ । आकारः ८$\frac{3}{8}$×२$\frac{3}{8}$ । ग्रन्थसंख्या १३० । पत्रसंख्या १५ । पञ्चमपादान्ता ।

दौर्गसिंहवृत्तिः

क्रमाङ्कः प्र. १६८८ विषयाङ्कः ८०

ग्रन्थकारः-दुर्गासिंहः । नेपालीयं कागतम् । नेवारी लिपिः । पंक्तयः ५। आकारः १३×३$\frac{3}{4}$ । ग्रन्थसंख्या १४०० । पत्रसंख्या १२४। खण्डिता ।

दौर्गसिंहवृत्तिः

क्रमाङ्कः द्वि. २२५ विषयाङ्कः ८१

ग्रन्थकारः-दुर्गसिंहः । नेपालीयं कागतम् । मैथिली लिपिः । पंक्तयः ८ । आकारः ११$\frac{1}{2}$×४$\frac{3}{4}$ । ग्रन्थसंख्या । पत्रसंख्या ४७ । प्रकीर्णा ।

दौर्गसिंहवृत्तिः

क्रमाङ्कः तृ. ५१३ विषयाङ्कः ८२

ग्रन्थकारः । दुर्गसिंहः ।मध्यदेशीयं कागतम् । देवनागरी लिपिः । पंक्तयः ६। आकारः १०$\frac{1}{4}$×३$\frac{1}{4}$। ग्रन्थसंख्याः १०४० । पत्रसंख्या । ६५ । प्रकीर्णरूपा जीर्णा ।

धर्मकीर्तिरचितव्याकरणः

क्रमाङ्कः च. ६४० विपायाङ्कः ८३

ग्रन्थकारः-धर्मकीर्तिः । ताड पत्राणि । मैथिली लिपिः । पंक्तयः । आकारः ग्रन्थ-संख्या । पत्रसंख्या ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धर्मकीर्तिरचितव्याकरणः

क्रमाङ्कः च. ७६८ विषयाङ्कः ८४

ग्रन्थकारः-धर्मकीर्तिः । ताडपत्राणि । मैथिली लिपिः । पंक्तयः ५ । आकारः । ग्रन्थसंख्या । पत्रसंख्या । प्रकीर्णः ।

धातुज्ञानम्

क्रमाङ्कः प्र. १६४७ विषयाङ्कः ८५

ग्रन्थकारः········। ताडपत्राणि । मैथिली लिपिः । पंक्तयः ४ । आकारः १४¾ × १⅓ । ग्रन्थसंख्या । पत्रसंख्या ६६ । जीर्णरुपम् ।

धातुपाठः

क्रमाङ्कः प्र. १०७८ विषयाङ्कः ८६

ग्रन्थकारः- पाणिनिः । ताडपत्राणि । नेवारी लिपिः । पंक्तयः ५ । आकारः ८½ × १½ । ग्रन्थसंख्या ३०० । पत्रसंख्या ३३ । सम्पूर्णः । समय ने. सं. ५३६ ।

आदिवाक्यम्

ॐ नम शिवायः । भूसत्तायां । चिति संज्ञाने । अत सातत्य गमने । च्युतिर आशेचने ।

अन्तवाक्यम्

